**चतुर्दशः पाठः**

# सुभाषितानि

समग्रे संस्कृतसाहित्ये सुभाषितानि पद्यानि प्राचुर्येण सुलभ्यन्ते। सुमधुराणि एतानि लोके अतीव प्रसिद्धानि। एतेषां प्रभावेण जनाः आचारे व्यवहारे च साफल्यं प्राप्नुवन्ति। संस्कृतमनीषिभिः जीवनस्यानुभवाः अत्र प्रकटिताः। 'सुभाषितभाण्डागारमिति' ग्रन्थात् केचित् सुभाषितश्लोकाः अस्मिन् पाठे प्रस्तुताः सन्ति।

**त्याग एको गुणः श्लाघ्यः, किमन्यैः गुणराशिभिः।**
**त्यागाज्जगति पूज्यन्ते, पशुपाषाणपादपाः ॥1॥**

**अन्वयः** - त्यागः एकः श्लाघ्यः गुणः, अन्यैः गुणराशिभिः किम् ? जगति त्यागात् पशुपाषाणपादपाः पूज्यन्ते।

| | | | |
|---|---|---|---|
| **शब्दार्थः** - | श्लाघ्यः | - | प्रशंसनीयः |
| | गुणराशिभिः | - | गुणसमूहैः, अनेकैः गुणैः |
| | जगति | - | संसारे, लोके |
| | पाषाणम् | - | प्रस्तरम् |
| | पादपाः | - | वृक्षाः |

**क्षमाशस्त्रं करे यस्य, दुर्जनः किं करिष्यति।**
**अतृणे पतितो वह्निः, स्वयमेवोपशाम्यति ॥2॥**

**अन्वयः** - यस्य करे क्षमाशस्त्रं (तस्य) दुर्जनः किं करिष्यति अतृणे पतितः वह्निः स्वयमेव उपशाम्यति।

| | | | |
|---|---|---|---|
| **शब्दार्थः** - | क्षमाशस्त्रम् | - | क्षमारूपिणम् आयुधम् (क्षमारूपीशस्त्र) |
| | वह्निः | - | अग्निः |
| | अतृणे | - | तृणरहिते |
| | करे | - | हस्ते |

**धर्मो यशो नयो दाक्ष्यं, मनोहारि सुभाषितम्।**
**इत्यादि गुणरत्नानां, सङ्ग्रही नावसीदति ॥3॥**

**अन्वयः** - धर्मः, यशः, नयः, दाक्ष्यं, मनोहारि सुभाषितम् इत्यादि गुणरत्नानां सङ्ग्रही न अवसीदति।

| | | | |
|---|---|---|---|
| **शब्दार्थः** - | नयः | - | नीतिः |
| | दाक्ष्यम् | - | चातुर्यम्, नैपुण्यम् (निपुणता) |
| | अवसीदति | - | दुःखीभवति |

**छायावन्तो गतव्याला: स्वारोहा: फलदायिन: ।**

**मार्गद्रुमा महान्तश्च परेषामेव भूतये ॥4॥**

**अन्वय:** - छायावन्त: गतव्याला: फलदायिन: स्वारोहा: मार्गद्रुमा: महान्तश्च परेषां भूतये एव ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| गतव्याला: | - | व्यालादि जन्तुभि: रहिता: |
| स्वारोहा: | - | सुखेन आरोहणीया: |
| द्रुमा: | - | वृक्षा: |
| भूतये | - | कल्याणाय |
| महान्त: | - | सज्जना: |

**सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।**

**आपत्सु च महाशैलशिलासंघातकर्कशम् ॥5॥**

**अन्वय:** - महतां चित्तं सम्पत्सु उत्पलकोमलं भवति आपत्सु च महाशैलशिलासंघातकर्कशम् (भवति) ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| महताम् | - | महापुरुषाणाम् |
| उत्पलकोमलम् | - | कमलपुष्पवत् कोमलम् |
| महाशैलम् | - | महापर्वतम् |
| शिला | - | प्रस्तरखण्डम् |
| कर्कशम् | - | कठोरम् |

**एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।**

**वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥6॥**

**अन्वय:** - यथा एकेन सुगन्धिना पुष्पितेन सुवृक्षेण तत् सर्वं वनं वासितम् (भवति) तथा सुपुत्रेण सर्वं कुलं (भवति) ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| पुष्पितेन | - | फुल्लकुसुमै: पूर्णेन (खिले हुए फूलों से परिपूर्ण) |
| वासितम् | - | सुगन्धितम् |
| सुपुत्रेण | - | सत्पुत्रेण (योग्य पुत्र से) |

**महाजनस्य संसर्ग: कस्य नोन्नतिकारक: ।**

**पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥7॥**

**अन्वय:** - महाजनस्य संसर्ग: कस्य उन्नतिकारक: न ? पद्मपत्रस्थितं वारि मुक्ताफलश्रियं धत्ते ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| महाजनस्य | - | महापुरुषस्य |
| संसर्ग: | - | सङ्गति: |
| पद्मपत्रम् | - | कमलपत्रम् |
| वारि | - | जलम् |

| | | |
|---|---|---|
| मुक्ताफलम् | - | मौक्तिकम् (मोती) |
| श्रियम् | - | शोभाम् |
| धत्ते | - | धारयति |

ध

**गुणैरुत्तुङ्गतां याति नौच्चैरासनसंस्थितः ।**
**प्रासादशिखरस्थोऽपि काकः किं गरुडायते ॥8॥**

**अन्वयः** - गुणैः उत्तुङ्गतां याति उच्चैः आसनसंस्थितः न। किं काकः प्रासादशिखरस्थः अपि गरुडायते !

**शब्दार्थः** -

| | | |
|---|---|---|
| उत्तुङ्गताम् | - | उच्चताम् (महानता) |
| प्रासादम् | - | राजभवनम्/महलम् |
| गरुडायते | - | गरुडो भवति। |

**देहीति वचनं श्रुत्वा देहस्थाः पञ्चदेवताः ।**
**मुखान्निर्गत्य गच्छन्ति श्रीह्रीधीधृतिकीर्तयः ॥9॥**

**अन्वयः** - 'देहि' इति वचनं श्रुत्वा देहस्थाः श्री-ह्री-धी-धृति-कीर्तयः पञ्चदेवताः मुखात् निर्गत्य गच्छन्ति।

**शब्दार्थः** -

| | | |
|---|---|---|
| देहस्थाः | - | शरीरे स्थिताः |
| श्रीः | - | शोभ सम्पदा (सम्पत्ति) |
| ह्रीः | - | लज्जा |
| धीः | - | बुद्धिः |
| धृतिः | - | धैर्यम् |
| कीर्तिः | - | यशः |

**उडुगणपरिवारो नायकोऽप्योषधीनाममृतमयशरीरः कान्तियुक्तोऽपि चन्द्रः ।**
**भवति विगतरश्मिर्मण्डलं प्राप्य भानोः परसदननिविष्टः को लघुत्वं न याति ॥10॥**

**अन्वयः** - उडुगणपरिवारः ओषधीनां नायकः अमृतमयशरीरः कान्तियुक्तः अपि चन्द्रः भानोः मण्डलं प्राप्य विगतरश्मिः भवति। परसदननिविष्टः कः लघुत्वं न याति।

**शब्दार्थः** -

| | | |
|---|---|---|
| उडुगणपरिवारः | - | तारागणाः |
| कान्तियुक्तः | - | प्रभापूर्णः |
| भानोः | - | सूर्यस्य |
| विगतरश्मिः | - | प्रकाशरहितः |
| परसदननिविष्टः | - | अन्यस्य गृहे प्रविष्टः |
| लघुत्वम् | - | न्यूनताम् |
| याति | - | गच्छति |

# अभ्यासः

1. **एकपदेन उत्तरत –**

(क) अतृणेपतितः का स्वयमेव उपशाम्यति ?

(ख) एकेन सुवृक्षेण किं वासितम् ?

(ग) कस्य संसर्गः उन्नतिकारकः ?

(घ) प्रासादशिखरस्थः अपि कः न गरुडायते ?

2. **एकवाक्येन उत्तरत –**

(क) त्यागात् के पूज्यन्ते ?

(ख) दुर्जनः कस्य किमपि न कर्तुं शक्नोति ?

(ग) कीदृशाः महाद्रुमाः परेषामेव भूतये भवन्ति ?

(घ) महत्तां चित्तं सम्पत्सु कीदृग् भवति ?

(ङ) देहस्थाः के पञ्चदेवताः ?

3. **रिक्तस्थानानि पूरयत –**

(क) त्यागः एकः ........................... गुणराशिभिः ।

(ख) अतृणे पतितो वह्निः .............................. ।

(ग) ...................................... सुभाषितम् ।

इत्यादि ...................................... ।

(घ) सम्पत्सु महतां चित्तं .............................. ।

आपत्सु .................................. ।

(ङ) पद्मपत्रस्थितं वारि .................................. ।

4. **युग्ममेलनं कुरुत –**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | पुष्पितेन | त्यागः |
| (ख) | देहस्थाः | चन्द्रः |
| (ग) | कान्तियुक्तः | सुवृक्षेण |
| (घ) | फलदायिनः | पञ्चदेवताः |
| (ङ) | श्लाघ्यः गुणः | महाद्रुमाः |

5. अधोलिखितपदानां विभक्तिं वचनञ्च लिखत -

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| करे | | |
| रत्नानाम् | | |
| भूतये | | |
| सम्पत्सु | | |
| सुपुत्रेण | | |
| महाजनस्य | | |
| त्यागात् | | |

6. अधोलिखितपदानां धातुं लकारं पुरुषं वचन च लिखत -

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| करिष्यति | | | | |
| धत्ते | | | | |
| गच्छन्ति | | | | |
| याति | | | | |
| पूज्यन्ते | | | | |

7. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -

(क) त्यागाज्जगति
(ख) इत्यादि
(ग) नावसीदति
(घ) देहीति
(ङ) मुखान्निर्गत्य

8. नामोल्लेखपूर्वकं समासविग्रहं कुरुत -

(क) महाशैलः
(ख) सुपुत्रः
(ग) पद्मपत्रस्थितम्
(घ) पशुपाषाणपादपाः
(ङ) उत्पलकोमलम्

## 9. अधोलिखितपदानां समानार्थिपदं लिखत -

(क) वह्निः

(ख) द्रुमाः

(ग) प्रस्तरखण्डम्

(घ) चन्द्रः

(ङ) भानुः

(च) धीः

(छ) धृतिः

(झ) कीर्तिः

## 10. अधोलिखितशब्दानां वाक्येषु प्रयोगं कुरुत -

(क) चन्द्रः

(ख) भानुः

(ग) उडुगणाः

(घ) पादपाः

(ङ) वह्निः

(च) वारि

## योग्यताविस्तारः -

- अन्यानि सुभाषितानि लिखित्वा कण्ठस्थं कुरुत।
- सुभाषितश्लोकानां सङ्ग्रहं कुरुत।